श्री कामाक्षी स्तवः

श्री कामाक्षी स्तवः

कंडूलगंडविगळन्मदवारिधारा-
गंडूषपंडितमधुव्रतमंडिताय |
शुंडालबंधुरमुखाय तुषारभानु-
खंडावतंसकलिताय नमः शिवाय ||1||

रसाळतलभूषितं रजनिबंधुना भूषितं
समग्रमनुकंपया सविधसेवितं कंपया |
नमत्सुमनसं पदे नमत संततं संपदे
गिरीशमधिकांचि तं गिरिसुताकुचांकांचितं ||2||

जयंति श्रीमंतो जडिमहिमसंहारमिहिरा
मनीषामाकंदप्रसवनववासंतदिवसाः |
गिरां नाथे! नानारसभणितियोषाभिसरण-
प्रदोषा निर्दोषास्तव चरण सन्नामविधयः ||3||

क एष प्रस्तावस्तव नवनसन्नाहपदवी -
दवीयो देवीदं धिषणधिषणानैपुणमपि |
तदास्तामुद्योगः स्तुतिवचसि याचे पुनरिदं
समस्तोऽत्र स्तोत्रीभवतु मम संजल्पनविधिः ||4||

सदा याचं याचं कथितबहुवाचं जनमिमं
प्रति क्रोधो वेधोरमणि! करणीयो न कलया |
न योगप्रावीण्यं न च बहुविधस्तोत्रपटिमा
न वा सेवादाक्ष्यं किमिह विदधे याचनमृते ||5||

जतुद्रावं देवि! द्रवतु जवतश्चित्तजडिमा
शरत्पद्मोन्मीलं मम विललमुन्मीलतु मनः |
मुखाद्वीची वाचां त्रिदिवविगळन्निर्जरधुनी-
तरंगाळीगाळं गळतु मधुनिष्यंदमधुरा ||6||

जगन्नाथे ! जाल्मं निबिडजडिभग्रंथिजटिलं
जनं दीनं मैनं जननि ! मनुथाः स्मान्यशरणं |
प्रमीळाप्रभ्लानं पदयुगळनाळीकविगळ-
न्मधूळीपाळीभिर्मम सरजसं क्षाळय मनः ||7||

जगन्मातर्जातप्रथिमनि मनीषाजडिमनि
स्तृणाने खिंदानः किमिव मनवै किं वितनवै |
प्रसीदासीदात्मन्यखिलदुरितोत्सादिनि ! दिने
दिने दीनेऽदीने! मयि वितर कारुण्यकणिकां ||8||

करे वामे वामे ! कमलमृदुळे पुस्तकधरं
परस्मिन् साक्षस्रक्स्फटिकनिभमत्रासवरदं |
भवत्वंतः साक्षादकृपणकृपाकंदळमिळत्-
कटाक्षव्यापारं वपुरुपनिषज्जीवितमिदं ||9||

कृपाकोपाटोपस्फुरितपदपंचास्यदळिताद्
धनस्वांतध्वांतप्रकरकरिसंदोहशिरसः |
समुन्मुक्ता मुक्तामणय इव शुद्धा भणितयोस
भवद्भक्तास्येभ्यो भगवति! विसर्पंति परितः ||10||

ममांतर्वाणि ! त्वं हर तिमिरमित्यर्थनविधां
विधास्यन् यस्तस्मै पदयुगळमात्रं कथयते |
असौ शास्त्रज्ञत्वं वरयितुमुपक्रांत इति तद्
ददानः सद्यस्ते जयति सदयासंभ्रमरसः ||11||

असौ सेवा दावे रुदितमियमिज्या जललिपि-
र्गजस्नानं ध्यानं तदपि स जपो भस्मनि हुतं |
प्रणामो नामष प्रकृतिजळमूकांघ्रिपतनं
यदंबालंब्येत प्रतिदिनमनुद्दिश्य भवतीं ||12||

सजीवो मा जीवन् भवति बत मा जाग्रदपि मा
विजानन् मा ध्यायन् जनजननि ! तस्यास्त्वजननिः |
न यस्त्वामाशास्ते न विनमति न स्तौति मनुते
न नोपास्ते नाध्येत्यवति न वृणीते न च सकृत् ||13||

गळद्दभ्भां शुभ्भत्पृथुलकुचकुंभां हृतशशि-
प्रभाडभ्भां संभावितलिखितगुभ्फाजपपटां |
मनस्तंभारभ्भप्रथुमनि(?) भजे त्वां कृतकृपा-
परीरभ्भाम्मंभोरुहसदनसंभोगकलिकां ||14||

भवत्या नित्योत्तंसितसितसुधातिविगळत्-
सुधासारस्रोतोविसर इव हृत्पंकजजुषः |
नृणां त्वद्ध्यातृणां नववदननाळीककुहर-
प्रणाळीनाळेन क्षरति कवितासौरभभरः ||15||

गतिस्विन्नां वन्यस्तबकनिवहन्यासविलसत्-
कचां केचित् काचावलिखचितनीचेतरकुचां |
हृदि त्वामीक्षंते कपटमृगयोः पत्रपटली-
दुकूलां कालारेरनुपदचरीं काननचरीं ||16||

धरे ! दुर्गां स्वर्गा धिपविमतवर्गापहरणीं
महारंहस्सिंहप्रवरपरिविन्यस्तचरणां |
करे वल्गत्खड्गप्रविहितजगत्त्राणविभवां
भवार्तिव्यावृत्त्यै भगवति ! भजंते हि भवतीं ||17||

इदं स्यादेतत् स्यान्मम पुनरदः स्यादिति सदा
श्रुतं वा दृष्टं वा सकलमुपयाचे न भवतीं |
सकृन्मह्यं मुह्यन्मलिनमनसे मातरमलां
त्वदीये दीयेत द्युतिमति पदे भारति! रतिं ||18||

अथो या वा सा वा भव भवरमेशांबुजभुवा-
मपीड्ये ! पीड्येऽहं जनजननि ! जाड्येन न यथा |
तथा भ्रूयाद् भूयानिह तव विभूतिस्तवविधिः
कथंकारं कर्तुं कविभिरपि शक्येत सकलः ||19||
इति कामाक्षीस्तवः संपूर्णः |